दिनाङ्क :- 20.05.2026

प्रात: - 06:55

## प्रधानमन्त्री- नोर्डिक् सम्मेलनम्

भारतं तथा नॉर्वे, स्वीडन, डेन्मार्क, फिन्लैण्ड्, आइसलैण्ड् इत्येते देशाः मिलित्वा स्वद्विपक्षीयसम्बन्धं, हरितप्रौद्योगिकीं, नवाचार-रणनीतिक-सहयोगं च सुदृढीकर्तुं विचारविमर्शान् कृतवन्तः। प्रधानमन्त्री श्रीमोदी ह्यः नार्वे-देशस्य राजधान्यां ओस्लो-नगरे तृतीय-भारत-नॉर्डिक-शिखरसम्मेलने भागं गृहीत्वा नॉर्डिक्-देशानां नेतृभिः सह संयुक्त-पत्रकार-सम्मेलनं सम्बोधयन् घोषणामेतां कृतवान् ।

प्रधानमन्त्रिणा मोदिना प्रोक्तं यत्, विगतदशवर्षेषु भारतस्य नॉर्डिक्देशानां च द्विपक्षीयव्यापारः प्रायः चतुर्गुणं वर्धितः वर्तते ।

प्रधानमन्त्री पुष्टिं कृतवान् यत् भारतस्य नॉर्डिक्-देशानां च सम्बन्धाः, व्यापार-आर्थिक-सहयोगेन अथ भारत-यूरोपीय-सङ्घस्य मुक्तव्यापार-सन्धिभिः सहितैः, सद्यः एव सम्पन्नव्यापार-सन्धिभिः नूतन-स्वर्णयुगे प्रविष्टाः सन्ति। अस्मिन् अवसरे वदन्तः नॉर्वे, स्वीडेन्, आइसलैण्ड्, फिन्लैण्ड्, डेन्मार्क देशानां प्रधानमन्त्रिणः लोकतन्त्रस्य मूल्यानां, नियमाधारित-वैश्विकव्यवस्थायाः, अद्यतन-परिवर्तमान-विश्वस्य बहुपक्षीय-संस्थासु तत्कालीन-परिष्कारस्य च प्रतिबद्धतां पुनरुक्तवन्तः।

प्रधानमन्त्री-इटली

प्रधानमन्त्री मोदी पञ्चराष्ट्रयात्रायाः पञ्चमे अन्तिमे च चरणे इटलीदेशस्य राजधानीं रोमनगरम् आगतवान्। भारतस्य समृद्धकला-परम्परायाः उत्सवे, भव्य-सांस्कृतिक-सन्ध्यायाः कार्यक्रमे, सम्पूर्ण-यूरोपतः भारतीयशास्त्रीय-सङ्गीतकाराः नर्तकाः च भागं गृहीत्वा प्रधानमन्त्रिणः मोदिनः स्वागतसत्कारस्य साक्षिणः अभवन् ।

लोकसभा-समितिः

लोकसभायाः अध्यक्षः ओम बिर्ला, निगम-विधि-संशोधन-विधेयकः विंशतिः षड्विंशतिः इत्यस्य कृते संयुक्त-समितिं घटितवान् । लोकसभा सांसदः सुधीर गुप्ता समितेः अध्यक्षरूपेण नियुक्तः जातः । समितौ लोकसभायाः एकविंशतिः सदस्याः, विनोद श्रीधर तावडे, सुजीत-कुमारः, उज्वल निकाम इत्येतैः सह राज्यसभायाः नव सदस्याः, कमलजीत-सेहरावत, बैजायन्त-पाण्डा, डॉ. निशिकान्तः दुबे इत्येतैः सह निम्नसदनस्य सदस्याः च सन्ति ।

रेलवे विद्युतीकरणम्

भारतीय रेलवे, विद्युतीकरणस्य दिशि महत्त्वपूर्ण-कार्यं कुर्वन्, विद्युतीकरणस्य नवनवतिः दशमलव षट् प्रतिशतं प्राप्नोति, यद्धि त्रि-सप्तत्युत्तर-अष्टशताधिक-ऊन-सप्तति-सहस्रं किलोमीटर्-तः अधिकं यावत् व्याप्तम् अस्ति। अस्मिन् वर्षे मार्चमासपर्यन्तं भारतेन व्यावहारिकरूपेण स्वस्य ब्रॉड गेज-जालस्य पूर्णविद्युत्करणं प्राप्य, यूरोपीयसङ्घस्य, यूनाइटेड् किङ्ग्डम्, अमेरिका-संयुक्तराज्यस्य च प्रमुखरेल-व्यवस्थाभ्यः अग्रे स्थितं वर्तते ।

## मणिपुरम्

मणिपुरस्य अपर-प्रमुख-वस्त्र-वाणिज्य-उद्योग-सचिवः अनुराग-बाजपेयी इत्यनेन उक्तं यत् राज्यसर्वकारः, राज्यस्य समृद्धानि वस्त्र-हस्तकरघा-परम्पराणि प्रवर्तयितुं अन्ताराष्ट्रिय-विपणिषु निर्यातं कर्तुं च कार्यं कुर्वन् अस्ति। इम्फाले मणिपुर-राज्य-निर्यात-कार्ययोजनायाः विषये चर्चायां वदन् सः अवदत् यत् मणिपुरस्य हस्तकरघा, वस्त्रोत्पादाः च वैश्विकरूपेण प्रतिस्पर्धां कर्तुं गुणवत्तां धारयन्ति। सः अवदत् यत् हस्तकरघाक्षेत्रं न केवलं अर्थव्यवस्थां सुदृढां करोति अपि तु महिला-सीव्यकाराणां सशक्तिकरणं करोति, आजीविकां च प्रददाति, राज्यस्य सांस्कृतिक-परम्परायाः संरक्षणे च साहाय्यं करोति ।

## आईपीएल

आई.पी.एल. इति विंशतिम्-प्रतिविंशतिः क्रिकेट्-लीग-प्रतिस्पर्धायां, गतरात्रौ, राजस्थान रायल्स् दलेन, लखनऊ सूपर जायण्ट्स् दलं सप्तस्तोभकैः पराजितम् । अद्य सायं सार्धसप्तवादने, कोलकाता नाईट राईडर्स् दलं, कोल्काता-नगरे, मुम्बई इण्डियन्स् दलं, सम्मुखीकरिष्यति ।